**विक्रीते करिणि किमङ्कुशे विवादः** When an elephant is sold what is the use of higgling about the goad. cf. सौमित्रिर्वदति विभीषणाय लङ्कां देहि त्वं भुवनपते विनैव कोशम्। सौमित्रि प्रति निजगाद रामचन्द्रो विक्रीते करिणि किमङ्कुशे विवादः॥; नारब्धं कुचपरिरम्भणेषु वाम्यं वैमत्यं विरचति चुम्बने कदापि। किं नीवीगतमबले रुणत्सि पाणिं विक्रीते करिणि किमङ्कुशे विवादः॥; Mar. " हत्ती गेला आणि शेपूट राहिलें!"

**विना मलयमन्यत्र चन्दनं न प्ररोहति** A sandal tree does not grow except on the Malaya mountain. This illustrates that a wise man prospers by taking recourse to another great man who appreciates merits.

**विनिगमनाविरहन्यायः** The simile of the absence of reasoning or argument supporting one of the two sides; एकतरपक्षपातिनी युक्तिर्विनिगमना, वैकल्पिके वस्तुन्येकस्मिन्नवधारणा शक्तिरिति यावत्। तस्या विरहो वियोग इत्यर्थः। लौ. न्याय.

**विलूननासिकस्यादर्शदर्शनम्** Showing a looking-glass to a man whose nose has been cut off! This is used as an incitement to wrath.

**विवेकभ्रष्टानां भवति विनिपातः शतमुखः** The downfall of those who have lost their discretion takes place through hundred openings. cf. शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्। अधोऽधो गङ्गेयं स्थलमुपगता स्तोकमधुना विवेक...शतमुखः Bh. 2. cf. Mar. " बुडत्याचा पाय खोलांत."

**विश्वजिन्न्यायः** Vide Dictionary p. 1475.

**विषकुम्भं पयोमुखम्** A bowl of poison with milk on the surface. " A wolf in the sheep's clothing." " Oh villain, villain, smiling, damned villain." Hamlet 1. 5; परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्। वर्जयेत् तादृशं मित्रं विष ... मुखम्। Chan. 18. cf. " मुखमें राम बगलमें छुरी "; " बोलणीं मानभावाचीं करणी कसाबाची."

**विषकृमिन्यायः** The maxim of the worms bred in poison. It is used to denote a state of things which, though fatal to others, is not so to those who being bred in it, are inured or naturalized to it like poison which though fatal to others, is not so to the worms bred in it. " What is one man's food is another man's poison." cf. विप्रास्मिन् नगरे महान् कथय कस्तालद्रुमाणां गणः को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि। को दक्षः परदारवित्तहरणे सर्वोऽपि दक्षो जनः कस्माज्जीवसि हे सखे विषकृमिन्यायेन जीवाम्यहम्॥ वृद्धचाणक्य.

**विषवृक्षन्यायः** The maxim of the poison tree; used to denote that a thing, though hurtful and mischievous does not deserve to be destroyed by the very person who has reared it, just as even a poison tree ought not to be cut down by the planter himself. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्। Ku. 2. 55; Pt. 1. 245.

**विहंगमन्यायः** The simile of a bird. cf. पिपीलिकागतिन्याय and प्लवंगमन्याय (the maxim of a monkey leaping from one branch of a tree to another). An ant is proverbially slow of gait, a monkey jumps or leaps, hence quicker; but a bird flies and naturally is the quickest of all. यथा पिपीलिकाप्लवंगमापेक्षया विहंगमोऽनायासेनोच्चतममपि मधुरं फलरसमास्वादते, तथैवोत्तमाधिकारी ज्ञानी मध्यमाधिकार्यपेक्षयानायासेन जन्मान्तरीयसंस्कारैः शुद्धान्तःकरणतया लब्धपूर्णज्ञानोऽचिरादेव चिदानन्दरूपतां प्राप्नोतीति। लौ.न्याय.; cf. देखें उत्प्लवनासरिसा। पक्षी फळासि झोंबे जैसा। सांगे नर केवि तैसा। पावे वेगां॥ ४१॥ तैसें देख पा विहंगममतें। अधिष्ठूनि ज्ञानातें। सांख्य सद्य मोक्षातें। आकळिती॥ ४३॥ ज्ञानेश्वरी अ. ३.

**वीचितरङ्गन्यायः** The maxim of a wave urging forward another wave. In the ocean one wave propels another till the first and all others in succession reach the shore. So this maxim is used to denote successive operation, as in the case of the production of sound. सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते। वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता॥ कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते। Bhāṣā. P. 165, 166.

**वृक्षप्रकम्पनन्यायः** The illustration of the shaking of a tree. A man is supposed to be up a tree whilst others are standing below it. One of the latter points to a particular branch which he wishes to be shaken and the others point out other branches for the same purpose; so the man shakes the whole tree at once and thus satisfies everybody by the one effort!

**वृक्षवृत्तिन्यायः** The illustration of the subsistence of trees. It is used to denote the manner of subsistence on things received of their own accord, without efforts. (अयाचितवृत्ति). अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः। बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः॥ Ku. 5. 22.

**वृद्धकुमारी-वाक्य(वर)-न्यायः** The maxim of the old virgin's boon; that is, asking such a boon as will cover all that one wishes to have. The Mbh. 8. 2. 3 says that an old virgin, when asked by Indra to choose a boon said, "पुत्रा मे बहुक्षीरमोदनं कांस्यपात्र्यां भुञ्जीरन्।" This one boon if granted, would give her a husband, progeny, abundance of corn, cattle etc., and gold. cf. वृद्धकुमारीवरप्रार्थन in तंत्र. 2. 2. 2.

**वृद्धिमिष्टवतो मूलमपि ते नष्टम्** Whilst seeking to obtain interest, the creditor loses [that and] the capital too. cf. वृद्धिमिष्टवतो मूलमपि विनष्टमिति न्यायः। वृद्धिर्धनप्रयोगेऽधमर्णात् प्राप्यांशभेदलाभः। तामिष्टवत उत्तमर्णस्याधमर्णदौष्ट्याद् यथा मूलं नश्यत्येवं यत्राभीष्टान्तरसंपादनाय प्रयतमानस्य मूलं नश्यति तत्रास्य प्रवृत्तिः। वाचस्पत्य.

**वृश्चिकभिया पलायमान आशीविषमुखे निपतितः** Running away through fear of a scorpion, he falls into the jaws of a poisonous snake. Avoiding Scylla, he falls into Charybdis! cf. एकामसिद्धिं परिहरतो द्वितीयापद्यते। cf. Mar. " आगींतून निघून फुफाट्यांत पडणें."